श्री महालक्ष्मी दंडकं

मंदारमालांचितकेशभारां मंदाकिनीनिर्झरगौरहारां ।
वृंदारिकावंदितकीर्तिपारां वंदामहे मां कृतसद्विहारां ॥1॥

जय दुग्धाब्धितनये जय नारायणप्रिये ।
जय हैरण्यवलये जय वेलापुराश्रये ॥2॥

जय जय जनयित्रि वेलापुराभ्यंतरप्रस्फुरत्स्फार-
सौधांचितोदारसालांतरागारखेलन्मुरारातिपार्श्वस्थिते ।
क्लृप्तविश्वस्थिते ।
चित्ररत्नज्वलद्रत्नसानूपमप्रत्नसौवर्ण
कोटीरकांतिच्छटाचित्रिताच्छांबरे । देवि दिव्यांबरे ।
फुल्लसन्मल्लिकामालिकाप्रोल्लसन्नीलभोगीशभोगप्रतीकाश-
वेण्यर्धचंद्रालिके । वल्गुनीलालके । केशसौरभ्यलोभ-
भ्रमत्स्थूलजंबूफलाभालिमालासमाकर्षणेहोत्पतन्मौलि-
वैडूर्यसंदर्श नत्रस्तलीलाशुकालोकजातस्मिते । देवजातस्तुते ।
ईश्वरीशेखरीभूतसोमस्मयोत्सादनाभ्युत्सुकत्वच्छिरःसंश्रित-
प्राप्तनित्योदयब्रघ्नशंकाकरस्वर्णकोटीरसंदर्शनानंदितस्वीय-
तातांककारोहणाभीप्सुलब्धांतिकार्कात्म-
जानिर्झराशंकनीयांतकस्तूरिकाचित्रके । वार्धिराट्पुत्रिके ।
मान्मथश्यामलेक्ष्वात्मधन्वाकृतिस्निग्धमुग्धाद्भुत-
भ्रूलता चालनारब्धलोकालिनिर्माणरक्षिण्यसंहारलीलेऽमले ।
सर्वदे कोमले । स्वप्रभान्यक्कृते स्वानुगश्रुत्यधःकारिणीकांति-
नीलोत्पले बाधितुं वागताभ्यां श्रवःसन्निधिं लोचनाभ्यां
भृशं भूषिते । मंजुसंभाषिते । किंचिदुद्भुद्धचांपेय-
पुष्पप्रतीकाशनासास्थितस्थूलमुक्ताफले ।
दत्तभक्तौघवांछाफले । शोणबिंबप्रवालाधरद्योतविद्योत-
मानोल्लसद्दाडिमीबीजराजिप्रतीकाशदंतावले ।
गत्यधः क्लृप्तदंतावले ।
त्वत्पतिप्रेरितत्वष्टसृष्टाद्भुतातीद्भभस्मासुरत्रस्त
दुर्गाशिवत्राणसंतुष्टतद्दत्तशीतांशुरेखायुगात्मत्वसंभावना-

योग्यमुक्तामयप्रोल्लसत्कुंडले । पालिताखंडले ॥1॥

अयि सुरुचिरनव्यदूर्वादलभ्रांतिनिष्पादकप्रोल्लसत्कंठ-
भूषानिबद्धायतानर्घ्यगारुत्मतांशुप्रजापात्यसारंग-
नारीस्थिरस्थापकाश्चर्यकृद्दिव्यमाधुर्यगीतोज्ज्वले । मंजुमुक्तावले ।
अंगदप्रोतदेवेंद्रनीलोपलत्विट्छटाश्यामलीभूतचोलोज्ज्वलस्थूल-
हेमार्गलाकारदोर्वल्लिके । फुल्लसन्मल्लिके । ऊर्मिकासंचयस्यूत
शोणोपलश्रीप्रवृद्धारुणच्छायमृद्वंगुलीपल्लवे ।
लालितानंदकृत्सल्लवे । दिव्यरेखांकुशांभोजचक्रध्व-
जाद्यंकराजत्करे । संपदेकाकरे ।
कंकणश्रेणिकाबद्धरत्नप्रभाजालचित्रीभवत्पद्मयुग्म-
स्फुरत्पंचशाखद्वये । गूढपुण्याशये । मत्पदाब्जोपकंठे
चतुःपूरुषार्था वसंत्यत्र मामाश्रयं कुर्वते तान् प्रदास्यामि
दासाय चेत्यर्थकं त्वन्मनोनिष्ठभावं जगन्मंगलं सूचयद् वा
वराभीतिमुद्राद्वया व्यंजयस्यंगपाणिद्वयेनांबिके । पद्मपत्रांबके ।
चारुगंभीरकंदर्पकेल्यर्थनाभीसरस्तीरसौवर्ण-
सोपानरेखागतोत्तुंगवक्षोजनामांकितस्वर्णशैल-
द्वयारोहणार्थेंद्रनीलोपलाबद्धसूक्ष्माध्व-
संभावनायोग्यसद्रोमराज्याढ्यदेहे रमे । का गतिः श्रीरमे ।
निष्कनक्षत्रमालासदृक्षाभनक्षत्रमालाप्रवालस्रगेकावली-
मुख्यभूषाविशेषप्रभाचित्रिताच्छोत्तरासंगसंछिन्नवक्षोरुहे
। चंचलागौरि हे ।
केलिकालक्वणत्किंकिणीश्रेणिकायुक्तसौवर्णकांचीनिबद्ध-
स्फुरत्स्पष्टनीव्याढ्यशुक्लांबरे । भासिताशांबरे ।
पुंडरीकाक्षवक्षःस्थलीचर्चितानर्घ्यपाटीरपंकांकितानंग-
निक्षेपकुंभस्तने । प्रस्फुरद्गोस्तने ॥2॥

गुरुनिबिडनितंबबिंबाकृतिद्राविताशीतरुक्स्यंदनप्रोतचंद्रावले-
पोत्करे । स्वर्णविद्युत्करे । भोः प्रयच्छामि ते चित्ररत्नोर्मिकां
मामिकां सादरादेह्यदो मध्यमं भूषयाद्यैतया द्रष्टुमिच्छाम्यहं
साध्विति त्वत्पतिप्रेरितायां मुदा पाणिनादाय धृत्वा रहः
केशवं लीलयानंदयः सप्तकीवास्ति ते । सप्तलोकीस्तुते ।

चित्ररोचिर्महामेखलामंडितानंतरत्नस्फुरत्तोरणालंकृत-
श्लक्ष्णकंदर्पकांताररंभातरुद्वंद्वसंभावनीयोरुयुग्मे रमे ।
संपदं देहि मे । पद्मरागोपलादर्शबिंबप्रभाच्छायसुस्निग्धजानु
॥॥ द्वये शोभने चंद्रबिंबानने ।
शंबरारातिजैत्रप्रयाणोत्सवारंभजृंभन्महा-
काहलीडंबरस्वर्णतूणीरजंघे शुभे । शारदार्कप्रमे ।
हंसराजक्वणद्धंसबिंबस्फुरद्धंसकालंकृतस्पष्ट-
लेखांकुशांभोजचक्रध्वज-व्यंजनालंकृतश्रीपदे ।
त्वां भजे संपदे । नम्रवृंदारिकाशेखरीभूतसौवर्ण-
कोटीररत्नावलीदीपिकाराजिनीराजितोत्तुंगगांगेय-
सिंहासनास्तीर्णसौवर्णबिंद्वंकसौरभ्यसंपन्नतल्पस्थिते ।
संततस्वःस्थिते । चेटिकादत्तकर्पूरखंडान्वितश्वेतवीटीदरादान-
लीलाचलद्दोर्लते । दैवतैरर्चिते । रत्नताटंककेयूरहारावली-
मुख्यभूषाच्छटारंजितानेकदासीसभावेष्टिते । देवताभिष्टुते ।
पार्श्वयुग्मोल्लसच्चामरग्राहिणीपंचशाखांबुजाधूत-
जृंभद्रणत्कंकणाभिष्टुताभीशुसच्चामराभ्यां मुदा चीज्यसे ।
कर्मठैरिज्यसे । मंजुमंजीरकांच्युर्मिकाकंकणश्रेणि-
केयूरहारावली- कुंडलीमौलिनासामणिद्योतिते । भक्तसंजीविते ॥3॥

जलधरगतशीतवातार्दिता चारुनीरंध्रदेवालयांतर्गता विद्युदेषा
हि किं भूतलेऽपि स्वमाहाल्यसंदर्शनार्थं क्षमामास्थिता
कल्पवल्येव किं घस्रमात्रोल्लसंतं रविं रात्रिमात्रोल्लसंतं विधुं
संविधाय स्वतो वेघसातुष्टचित्तेन सृष्टा सदाप्युल्लसंती
महादिव्यतेजोमयी दिव्यपांचालिका वेति सद्भिः सदा तवर्यसे । त्वां
भजे मे भव श्रेयसे । पूर्वकद्वारनिष्ठेन नृत्यद्वराकाररंभा-
दिवारांगनाश्रेणिगीतामृताकर्णनायत्त-
चित्तामराराधितेनोच्चकैर्भार्गवींद्रेण संभाविते । नो समा
देवता देवि ते । दक्षिणद्वारनिष्ठेन सच्चित्रगुप्तादियुक्तेन
वैवस्वतेनार्च्यसे । योगिभिर्भाव्यसे । पश्चिमद्वारभाजा भृशं
पाशिना स्वर्णेदी- मुख्यनद्यन्वितेनेड्यसे । सादरं पूज्यसे ।
उत्तरद्वारनिष्ठेन यक्षोत्तमैर्नम्रकोटीरजूटैर्मनोहारिभी
राजराजेन भक्तेन संभाव्यसे । योगिभिः पूज्यसे । लक्ष्मि

पद्मालये भार्गवि श्रीरमे लोकमातः समुद्रेशकन्येऽच्युतप्रेयसि
॥॥। स्वर्णशोभे च मे चेंदिरे विष्णुवक्षः स्थिते
पाहि पाहीति यः प्रातरुत्थाय भक्त्या युतो नौति सोऽयं नरः
संपदं प्राप्य विद्योतते । भूषणद्योतिते । दिव्य
कारुण्यदृष्ट्याशु मां पश्य मे दिव्यकारुण्यदृष्ट्याशु
मां पश्य मे दिव्यकारुण्यदृष्ट्याशु मां पश्य मे । मां किमर्थं
सदोपेक्षसे नेक्षसे त्वत्पदाब्जं विना नास्ति मेऽन्या गतिः संपदं देहि
मे संपदं देहि मे संपदं देहि मे । त्वत्पदाब्जं प्रपन्नोऽस्म्यहं
सर्वदा त्वं प्रसन्ना सती पाहि मां पाहि मां पाहि मां पद्महस्ते
त्रिलोकेश्वरिं प्रार्थये त्वामहं देवि तुभ्यं नमो देवि तुभ्यं नमो
देवि तुभ्यं नमः ॥सत्रिषष्ट्युत्तरशतरगणाढ्यश्चतुर्दलः ।
महालक्ष्मीदंडकोऽयं कृतः केशवसूरिणा ॥

इति केशवसूरिकृतः महालक्ष्मीदंडकः संपूर्णः ।
स्तोत्रसमुच्चयः 2 (85)